# Shri Ramataravali

# શ્રીરામતારાવલિઃ

## Document Information

Text title : Shri Ramataravali

File name : rAmatArAvaliH.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

# શ્રીરામતારાવલિઃ

તારકં તાટકારાતિં તાપત્રયનિવારકમ્ ।
તત્સ્વરૂપચિદાનન્દં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧॥

સર્વશં સર્વદેવેશં સનકાદિભિરર્ચિતમ્ ।
સનાતનતમં દેવં રામં વન્દે જગદ્ગુરુમ્ ॥ ૨॥

વિશ્વરૂપં વિશ્વધરં વિશ્વવ્યાપિનમવ્યયમ્ ।
વિશ્વોત્પત્તિસ્થાનભૂતં રામં વન્દે જગદ્ગુરુમ્ ॥ ૩॥

તુષારાદ્રિસુતાવન્દ્યં તૃણીકૃતદશાનનમ્ ।
તુલારહિતરૂપાઢ્યં રામં વન્દે જગદ્ગુરુમ્ ॥ ૪॥

વરદં વાસુદેવાખ્યં વાલ્મીકિવિનુતં હરિમ્ ।
વંશીરવાનુરક્તં ચ રામં વન્દે જગદ્ગુરુમ્ ॥ ૫॥

રેવતીરમણં શાન્તં રાકાચન્દ્રનિભાનનમ્ ।
રાક્ષસાન્તકરં રમ્યં રામં વન્દે જગદ્ગુરુમ્ ॥ ૬॥

નિર્મલં નિગમાકારં નીલજીમૂતસન્નિભમ્ ।
નિત્યાનન્દં નિરાભાસં રામં વન્દે જગદ્ગુરુમ્ ॥ ૭॥

યજ્ઞેશં યજ્ઞભોક્તારં યજ્ઞપુણ્યફલપ્રદમ્ ।
યક્ષરાક્ષસભેત્તારં રામં વન્દે જગદ્ગુરુમ્ ॥ ૮॥

ભર્ગધર્મપ્રભેત્તારં ભક્તાનામભયપ્રદમ્ ।
ભક્તહૃદ્ગેહવાસિનં (સંવાસં) રામં વન્દે જગદ્ગુરુમ્ ॥ ૯॥

ગોધનં ક્રોધરહિતં ગોપીજનમનોહરમ્ ।
ગોધવાર્ચિતપાદાબ્જં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૦॥

દેવેશં દેવતાવન્દ્યં દેવાન્તકનિષૂદનમ્ ।
બાધનાતીતમમલં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૧॥

વરાહરૂપં વાગીશં વામનાકારમચ્યુતમ્ ।
સ્નેહીકૃતહનૂમન્તં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૨॥

સર્વજ્ઞં સર્વદેવેશં સર્વભૂતહિતે રતમ્ ।
સર્વયજ્ઞાધિપં સર્વં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૩॥

ભીકૃતારાતિનિકરં પ્રકૃતેઃ પરમવ્યયમ્ ।
પ્રવ્યક્તમમલં ભવ્યં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૪॥

માયાતીતં મૌનિગમ્યં માધવં મત્સ્યરૂપિણમ્ ।
મારીચમદહન્તારં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૫॥

હિરણ્યવર્ણં સીતાભિરામાવામાઙ્કસંસ્થિતમ્ ।
શરણ્યં સર્વલોકાનાં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૬॥

ધીરં નીરધિગમ્ભીરં શૂરં શત્રુનિબર્હણમ્ ।
મારકોટિશુભાકારં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૭॥

ઈષાશેષમૃષાશેષકાયિનં બહુમાયિનમ્ ।
પોષિતાશેષદીનૌઘં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૮॥

નતાર્તિશમમાનન્દમવ્યયં ચિત્સ્વરૂપિણમ્ ।
અવ્યક્તમમલં ભવ્યં રામં વન્દે જગદ્ગુરુમ્ ॥ ૧૯॥

પ્રવ્યક્તમમલં શાન્તં મધ્યમં ચિત્સ્વરૂપિણમ્ ।
અવ્યક્તમભિભેત્તારં રામં વન્દે જગદ્ગુરુમ્ ॥ ૨૦॥

ચોદિતં વેદનિકરૈર્નાદબિન્દુકલાત્મકમ્ ।
આધારં સર્વભૂતાનાં રામં વન્દે જગદ્ગુરુમ્ ॥ ૨૧॥

દયાસિન્ધું સુમનસાં હૃદયાનન્દચન્દિરમ્ ।
સદાનન્દકરં વિષ્ણું રામં વન્દે જગદ્ગુરુમ્ ॥ ૨૨॥

યો ગતિઃ સર્વભૂતાનાં યોગદાનાદિકર્મિણામ્ ।
યોગમાયાધારભૂતં રામં વન્દે જગદ્ગુરુમ્ ॥ ૨૩॥

રામતારાવલીમેનાં પ્રત્યહં યઃ પઠેન્નરઃ ।
સ ગચ્છેદ્રામસાયુજ્યં ન પુનર્લભતેઽસુખં (જનિમ્) ॥ ૨૪॥

ઇતિ શ્રીરામતારાવલિઃ સમ્પૂર્ણા ।

Proofread by Aruna Narayanan

*Shri Ramataravali*

pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*